SHRADHA
SHIRDI SAIBABA MANDIR
Regd. As Harrisburg Sai Seva Samithi
[A 501(C)(3) CERTIFIED NON PROFIT ORGANIZATION] TAX ID - 47-2266572
599 Range End Rd, Dillsburg, PA 17019    717-502-7269
SABURI




# MONDAY SHIVA BHAJANS – HINDI

## Contents

Linga stakam - लिंगाष्टकम् ..... 2
Kasi visvanathastakam - काशी विश्वनाथाष्टकम् ..... 4
Sivastakam - शिवाष्टकम् ..... 6
Bilvastakam - बिल्वाष्टकम् ..... 7
Chandrasekhara stakam - चंद्रशेखराष्टकम् ..... 8
Ardha narisvara astakam - अर्ध नारीश्वर अष्टकम् ..... 11
NirvaNa satakam - निर्वाण षट्कम् ..... 13
Nityanandakari -annapurNastotram ..... 14
श्री अन्नपूर्णा स्तोत्रम् ..... 14
Siva astottara sata namavaḷi - शिव अष्टोत्तर शत नामावलि ..... 17
Maha linga mantram - महा लिंगा मंत्रम ..... 22

# LINGA STAKAM - लिंगाष्टकम्

ब्रह्ममुरारि सुरार्चित लिंगं
निर्मलभासित शोभित लिंगम् ।
जन्मज दुःख विनाशक लिंगं
तत्प्रणमामि सदाशिव लिंगम् ॥ 1 ॥

देवमुनि प्रवरार्चित लिंगं
कामदहन करुणाकर लिंगम् ।
रावण दर्प विनाशन लिंगं
तत्प्रणमामि सदाशिव लिंगम् ॥ 2 ॥

सर्व सुगंध सुलेपित लिंगं
बुद्धि विवर्धन कारण लिंगम् ।
सिद्ध सुरासुर वंदित लिंगं
तत्प्रणमामि सदाशिव लिंगम् ॥ 3 ॥

कनक महामणि भूषित लिंगं
फणिपति वेष्टित शोभित लिंगम् ।
दक्षसुयज्ञ विनाशन लिंगं
तत्प्रणमामि सदाशिव लिंगम् ॥ 4 ॥

कुंकुम चंदन लेपित लिंगं
पंकज हार सुशोभित लिंगम् ।

संचित पाप विनाशन लिंगं
तत्प्रणमामि सदाशिव लिंगम् ॥ 5 ॥

देवगणार्चित सेवित लिंगं
भावै-र्भक्तिभिरेव च लिंगम् ।
दिनकर कोटि प्रभाकर लिंगं
तत्प्रणमामि सदाशिव लिंगम् ॥ 6 ॥

अष्टदलोपरिवेष्टित लिंगं
सर्वसमुद्भव कारण लिंगम् ।
अष्टदरिद्र विनाशन लिंगं
तत्प्रणमामि सदाशिव लिंगम् ॥ 7 ॥

सुरगुरु सुरवर पूजित लिंगं
सुरवन पुष्प सदार्चित लिंगम् ।
परात्परं (परमपदं) परमात्मक लिंगं
तत्प्रणमामि सदाशिव लिंगम् ॥ 8 ॥

लिंगाष्टकमिदं पुण्यं यः पठेश्शिव सन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥

# KASI VISVANATHASTAKAM - काशी विश्वनाथाष्टकम्

गंगा तरंग रमणीय जटा कलापं
गौरी निरंतर विभूषित वाम भागं
नारायण प्रियमनंग मदापहारं
वाराणसी पुरपतिं भज विश्वनाथम् ॥ 1 ॥

वाचामगोचरमनेक गुण स्वरूपं
वागीश विष्णु सुर सेवित पाद पद्मं
वामेण विग्रह वरेन कलत्रवंतं
वाराणसी पुरपतिं भज विश्वनाथम् ॥ 2 ॥

भूतादिपं भुजग भूषण भूषितांगं
व्याघ्रांजिनां बरधरं, जटिलं, त्रिनेत्रं
पाशांकुशाभय वरप्रद शूलपाणिं
वाराणसी पुरपतिं भज विश्वनाथम् ॥ 3 ॥

सीतांशु शोभित किरीट विराजमानं
बालेक्षणातल विशोषित पंचबाणं
नागाधिपा रचित बासुर कर्ण पूरं
वाराणसी पुरपतिं भज विश्वनाथम् ॥ 4 ॥

पंचाननं दुरित मत्त मतंगजानां
नागांतकं धनुज पुंगव पन्नागानां

दावानलं मरण शोक जराटवीनां
वाराणसी पुरपतिं भज विश्वनाथम् ॥ 5 ॥

तेजोमयं सगुण निर्गुणमद्वितीयं
आनंद कंदमपराजित मप्रमेयं
नागात्मकं सकल निष्कलमात्म रूपं
वाराणसी पुरपतिं भज विश्वनाथम् ॥ 6 ॥

आशां विहाय परिहृत्य परश्य निंदां
पापे रथिं च सुनिवार्य मनस्समाधौ
आधाय हृत्-कमल मध्य गतं परेशं
वाराणसी पुरपतिं भज विश्वनाथम् ॥ 7 ॥

रागाधि दोष रहितं स्वजनानुरागं
वैराग्य शांति निलयं गिरिजा सहायं
माधुर्य धैर्य सुभगं गरलाभिरामं
वाराणसी पुरपतिं भज विश्वनाथम् ॥ 8 ॥

वाराणसी पुर पते स्थवनं शिवस्य
व्याख्यातं अष्टकमिदं पठते मनुष्य
विद्यां श्रियं विपुल सौख्यमनंत कीर्तिं
संप्राप्य देव निलये लभते च मोक्षम् ॥
विश्वनाथाष्टकमिदं पुण्यं यः पठेः शिव सन्निधौ
शिवलोकमवाप्नोति शिवेनसह मोदते ॥

# SIVASTAKAM - शिवाष्टकम्

प्रभुं प्राणनाथं विभुं विश्वनाथं जगन्नाथ नाथं सदानंद भाजाम् ।
भवद्भव्य भूतेश्वरं भूतनाथं, शिवं शंकरं शंभु मीशानमीडे ॥ 1 ॥

गले रुंडमालं तनौ सर्पजालं महाकाल कालं गणेशादि पालम् ।
जटाजूट गंगोत्तरंगैर्विशालं, शिवं शंकरं शंभु मीशानमीडे ॥ 2॥

मुदामाकरं मंडनं मंडयंतं महा मंडलं भस्म भूषाधरं तम् ।
अनादिं ह्यपारं महा मोहमारं, शिवं शंकरं शंभु मीशानमीडे ॥ 3 ॥

वटाधो निवासं महाट्टाट्टहासं महापाप नाशं सदा सुप्रकाशम् ।
गिरीशं गणेशं सुरेशं महेशं, शिवं शंकरं शंभु मीशानमीडे ॥ 4 ॥

गिरींद्रात्मजा संगृहीतार्धदेहं गिरौ संस्थितं सर्वदापन्न गेहम् ।
परब्रह्म ब्रह्मादिभिर्-वंद्यमानं, शिवं शंकरं शंभु मीशानमीडे ॥ 5 ॥
कपालं त्रिशूलं कराभ्यां दधानं पदांभोज नम्राय कामं ददानम् ।

बलीवर्धमानं सुराणां प्रधानं, शिवं शंकरं शंभु मीशानमीडे ॥ 6 ॥
शरच्चंद्र गात्रं गणानंदपात्रं त्रिनेत्रं पवित्रं धनेशस्य मित्रम् ।

अपर्णा कलत्रं सदा सच्चरित्रं, शिवं शंकरं शंभु मीशानमीडे ॥ 7 ॥
हरं सर्पहारं चिता भूविहारं भवं वेदसारं सदा निर्विकारं।

श्मशाने वसंतं मनोजं दहंतं, शिवं शंकरं शंभु मीशानमीडे ॥ 8 ॥

स्वयं यः प्रभाते नरश्शूल पाणे पठेत् स्तोत्ररत्नं त्विहप्राप्यरत्नम् ।
सुपुत्रं सुधान्यं सुमित्रं कलत्रं विचित्रैस्समाराध्य मोक्षं प्रयाति ॥

## BILVASTAKAM - बिल्वाष्टकम्

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रियायुधम् ।
त्रिजन्म पापसंहारं एकबिल्वं शिवार्पणम् ॥

त्रिशाखैः बिल्वपत्रैश्च अच्छिद्रैः कोमलैः शुभैः ।
तवपूजां करिष्यामि एकबिल्वं शिवार्पणम् ॥

कोटि कन्या महादानं तिलपर्वत कोटयः ।
कांचनं शैलदानेन एकबिल्वं शिवार्पणम् ॥

काशीक्षेत्र निवासं च कालभैरव दर्शनम् ।
प्रयागे माधवं दृष्ट्वा एकबिल्वं शिवार्पणम् ॥

इंदुवारे व्रतं स्थित्वा निराहारो महेश्वराः ।
नक्तं हौष्यामि देवेश एकबिल्वं शिवार्पणम् ॥

रामलिंग प्रतिष्ठा च वैवाहिक कृतं तथा ।
तटाकानिच संधानं एकबिल्वं शिवार्पणम् ॥

अखंड बिल्वपत्रं च आयुतं शिवपूजनम् ।
कृतं नाम सहस्रेण एकबिल्वं शिवार्पणम् ॥

उमया सहदेवेश नंदि वाहनमेव च ।
भस्मलेपन सर्वांगं एकबिल्वं शिवार्पणम् ॥

सालग्रामेषु विप्राणां तटाकं दशकूपयोः ।
यज्ञकोटि सहस्रस्य एकबिल्वं शिवार्पणम् ॥

दंति कोटि सहस्रेषु अश्वमेधशतक्रतौ च ।
कोटिकन्या महादानं एकबिल्वं शिवार्पणम् ॥

बिल्वाणां दर्शनं पुण्यं स्पर्शनं पापनाशनम् ।
अघोर पापसंहारं एकबिल्वं शिवार्पणम् ॥

सहस्रवेद पाटेषु ब्रह्मस्तापनमुच्यते ।
अनेकव्रत कोटीनां एकबिल्वं शिवार्पणम् ॥

अन्नदान सहस्रेषु सहस्रोपनयनं तधा ।
अनेक जन्मपापानि एकबिल्वं शिवार्पणम् ॥

बिल्वाष्टकमिदं पुण्यं यः पठेश्शिव सन्निधौ ।
शिवलोकमवाप्नोति एकबिल्वं शिवार्पणम् ॥

## CHANDRASEKHARA STAKAM - चंद्रशेखराष्टकम्

चंद्रशेखर चंद्रशेखर चंद्रशेखर पाहिमाम् ।
चंद्रशेखर चंद्रशेखर चंद्रशेखर रक्षमाम् ॥

रत्नसानु शरासनं रजताद्रि शृंग निकेतनं
शिंजिनीकृत पन्नगेश्वर मच्युतानल सायकम् ।
क्षिप्रदग्द पुरत्रयं त्रिदशालयै-रभिवंदितं
चंद्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ 1 ॥

पंचपादप पुष्पगंध पदांबुज द्वयशोभितं
फाललोचन जातपावक दग्ध मन्मध विग्रहम् ।
भस्मदिग्ध कलेबरं भवनाशनं भव मव्ययं
चंद्रशेखर चंद्रशेखर चंद्रशेखर रक्षमाम् ॥ 2 ॥

मत्तवारण मुख्यचर्म कृतोत्तरीय मनोहरं
पंकजासन पद्मलोचन पूजितांघ्रि सरोरुहम् ।
देव सिंधु तरंग श्रीकर सिक्त शुभ्र जटाधरं
चंद्रशेखर चंद्रशेखर चंद्रशेखर पाहिमाम् ॥ 3 ॥

यक्ष राजसखं भगाक्ष हरं भुजंग विभूषणम्
शैलराज सुता परिष्कृत चारुवाम कलेबरम् ।
क्षेल नीलगलं परश्वध धारिणं मृगधारिणम्
चंद्रशेखर चंद्रशेखर चंद्रशेखर पाहिमाम् ॥ 4 ॥

कुंडलीकृत कुंडलीश्वर कुंडलं वृषवाहनं
नारदादि मुनीश्वर स्तुतवैभवं भुवनेश्वरम् ।
अंधकांतक माश्रितामर पादपं शमनांतकं
चंद्रशेखर चंद्रशेखर चंद्रशेखर रक्षमाम् ॥ 5 ॥

भेषजं भवरोगिणा मखिलापदा मपहारिणं
दक्षयज्ञ विनाशनं त्रिगुणात्मकं त्रिविलोचनम् ।
भक्ति मुक्ति फलप्रदं सकलाघ संघ निबर्हणं
चंद्रशेखर चंद्रशेखर चंद्रशेखर रक्षमाम् ॥ 6 ॥

भक्तवत्सल-मर्चितं निधिमक्षयं हरिदंबरं
सर्वभूत पतिं परात्पर-मप्रमेय मनुत्तमम् ।
सोमवारिन भूहुताशन सोम पाद्यखिलाकृतिं
चंद्रशेखर चंद्रशेखर चंद्रशेखर पाहिमाम् ॥ 7 ॥

विश्वसृष्टि विधायकं पुनरेवपालन तत्परं
संहरं तमपि प्रपंच मशेषलोक निवासिनम् ।
क्रीडयंत महर्निशं गणनाथ यूथ समन्वितं
चंद्रशेखर चंद्रशेखर चंद्रशेखर रक्षमाम् ॥ 8 ॥

मृत्युभीत मृकंडुसूनुकृतस्तवं शिवसन्निधौ
यत्र कुत्र च यः पठेन्न हि तस्य मृत्युभयं भवेत् ।
पूर्णमायुररोगतामखिलार्थसंपदमादरं
चंद्रशेखर एव तस्य ददाति मुक्तिमयत्नतः ॥ 9 ॥

## ARDHA NARISVARA ASTAKAM - अर्ध नारीश्वर अष्टकम्

चांपेयगौरार्धशरीरकायै
कर्पूरगौरार्धशरीरकाय ।
धम्मिल्लकायै च जटाधराय
नमः शिवायै च नमः शिवाय ॥ 1 ॥

कस्तूरिकाकुंकुमचर्चितायै
चितारजःपुंज विचर्चिताय ।
कृतस्मरायै विकृतस्मराय
नमः शिवायै च नमः शिवाय ॥ 2 ॥

झणत्क्वणत्कंकणनूपुरायै
पादाब्जराजत्फणिनूपुराय ।
हेमांगदायै भुजगांगदाय
नमः शिवायै च नमः शिवाय ॥ 3 ॥

विशालनीलोत्पललोचनायै
विकासिपंकेरुहलोचनाय ।
समेक्षणायै विषमेक्षणाय
नमः शिवायै च नमः शिवाय ॥ 4 ॥

मंदारमालाकलितालकायै
कपालमालांकितकंधराय ।

दिव्यांबरायै च दिगंबराय
नमः शिवायै च नमः शिवाय ॥ 5 ॥

अंभोधरश्यामलकुंतलायै
तटित्प्रभाताम्रजटाधराय ।
निरीश्वरायै निखिलेश्वराय
नमः शिवायै च नमः शिवाय ॥ 6 ॥

प्रपंचसृष्ट्युन्मुखलास्यकायै
समस्तसंहारकतांडवाय ।
जगज्जनन्यै जगदेकपित्रे
नमः शिवायै च नमः शिवाय ॥ 7 ॥

प्रदीप्तरत्नोज्ज्वलकुंडलायै
स्फुरन्महापन्नगभूषणाय ।
शिवान्वितायै च शिवान्विताय
नमः शिवायै च नमः शिवाय ॥ 8 ॥

एतत्पठेदष्टकमिष्टदं यो
भक्त्या स मान्यो भुवि दीर्घजीवी ।
प्राप्नोति सौभाग्यमनंतकालं
भूयात्सदा तस्य समस्तसिद्धिः ॥

# NIRVANA SATAKAM - निर्वाण षट्कम्

मनो बुध्यहंकार चित्तानि नाहं
न च श्रोत्र जिह्वे न च घ्राणनेत्रे ।
न च व्योम भूमिर्-न तेजो न वायुः
चिदानंद रूपः शिवोऽहं शिवोऽहम् ॥ 1 ॥

न च प्राण संज्ञो न वैपंचवायुः
न वा सप्तधातुर्-न वा पंचकोशाः ।
नवाक्पाणि पादौ न चोपस्थ पायू
चिदानंद रूपः शिवोऽहं शिवोऽहम् ॥ 2 ॥

न मे द्वेषरागौ न मे लोभमोहो
मदो नैव मे नैव मात्सर्यभावः ।
न धर्मो न चार्थो न कामो न मोक्षः
चिदानंद रूपः शिवोऽहं शिवोऽहम् ॥ 3 ॥

न पुण्यं न पापं न सौख्यं न दुःखं
न मंत्रो न तीर्थं न वेदा न यज्ञः ।
अहं भोजनं नैव भोज्यं न भोक्ता
चिदानंद रूपः शिवोऽहं शिवोऽहम् ॥ 4 ॥

न मृत्युर्न शंका न मे जाति भेदः
पिता नैव मे नैव माता न जन्मः ।

न बंधुर्-न मित्रं गुरुर्नैव शिष्यः
चिदानंद रूपः शिवोऽहं शिवोऽहम् ॥ 5 ॥

अहं निर्विकल्पो निराकार रूपो
विभूत्वाच्च सर्वत्र सर्वेंद्रियाणाम् ।
न वा बंधनं नैवर्-मुक्ति न बंधः ।
चिदानंद रूपः शिवोऽहं शिवोऽहम् ॥ 6 ॥

## NITYANANDAKARI -ANNAPURNASTOTRAM

## श्री अन्नपूर्णा स्तोत्रम्

नित्यानंदकरी वराभयकरी सौंदर्य रत्नाकरी
निर्धूताखिल घोर पावनकरी प्रत्यक्ष माहेश्वरी ।
प्रालेयाचल वंश पावनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलंबनकरी मातान्नपूर्णेश्वरी ॥ 1 ॥

नाना रत्न विचित्र भूषणकरि हेमांबराडंबरी
मुक्ताहार विलंबमान विलसत्-वक्षोज कुंभांतरी ।
काश्मीरागरु वासिता रुचिकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलंबनकरी मातान्नपूर्णेश्वरी ॥ 2 ॥

योगानंदकरी रिपुक्षयकरी धर्मैक्य निष्ठाकरी
चंद्रार्कानल भासमान लहरी त्रैलोक्य रक्षाकरी ।

सर्वैश्वर्यकरी तपः फलकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलंबनकरी मातान्नपूर्णेश्वरी ॥ 3 ॥

कैलासाचल कंदरालयकरी गौरी-ह्युमाशांकरी
कौमारी निगमार्थ-गोचरकरी-ह्योंकार-बीजाक्षरी ।
मोक्षद्वार-कवाटपाटनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलंबनकरी मातान्नपूर्णेश्वरी ॥ 4 ॥

दृश्यादृश्य-विभूति-वाहनकरी ब्रह्मांड-भांडोदरी
लीला-नाटक-सूत्र-खेलनकरी विज्ञान-दीपांकुरी ।
श्रीविश्वेशमनः-प्रसादनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलंबनकरी मातान्नपूर्णेश्वरी ॥ 5 ॥

उर्वीसर्वजयेश्वरी जयकरी माता कृपासागरी
वेणी-नीलसमान-कुंतलधरी नित्यान्न-दानेश्वरी ।
साक्षान्मोक्षकरी सदा शुभकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलंबनकरी मातान्नपूर्णेश्वरी ॥ 6 ॥

आदिक्षांत-समस्तवर्णनकरी शंभोस्त्रिभावाकरी
काश्मीरा त्रिपुरेश्वरी त्रिनयनि विश्वेश्वरी शर्वरी ।
स्वर्गद्वार-कपाट-पाटनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलंबनकरी मातान्नपूर्णेश्वरी ॥ 7 ॥

देवी सर्वविचित्र-रत्नरुचिता दाक्षायिणी सुंदरी
वामा-स्वादुपयोधरा प्रियकरी सौभाग्यमाहेश्वरी ।
भक्ताभीष्टकरी सदा शुभकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलंबनकरी मातान्नपूर्णेश्वरी ॥ 8 ॥

चंद्रार्कानल-कोटिकोटि-सदृशी चंद्रांशु-बिंबाधरी
चंद्रार्काग्नि-समान-कुंडल-धरी चंद्रार्क-वर्णेश्वरी
माला-पुस्तक-पाशसांकुशधरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलंबनकरी मातान्नपूर्णेश्वरी ॥ 9 ॥
क्षत्रत्राणकरी महाभयकरी माता कृपासागरी
सर्वानंदकरी सदा शिवकरी विश्वेश्वरी श्रीधरी ।
दक्षाक्रंदकरी निरामयकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलंबनकरी मातान्नपूर्णेश्वरी ॥ 10 ॥

अन्नपूर्णे सदापूर्णे शंकर-प्राणवल्लभे ।
ज्ञान-वैराग्य-सिद्ध्यर्थं भिक्षां देहि च पार्वती ॥ 11 ॥

माता च पार्वतीदेवी पितादेवो महेश्वरः ।
बांधवा: शिवभक्ताश्च स्वदेशो भुवनत्रयम् ॥ 12 ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ अन्नपूर्णा स्तोत्रम् ।

# SIVA ASTOTTARA SATA NAMAVAḶI - शिव अष्टोत्तर शत नामावलि

ॐ शिवाय नमः

ॐ महेश्वराय नमः

ॐ शंभवे नमः

ॐ पिनाकिने नमः

ॐ शशिशेखराय नमः

ॐ वामदेवाय नमः

ॐ विरूपाक्षाय नमः

ॐ कपर्दिने नमः

ॐ नीललोहिताय नमः

ॐ शंकराय नमः (10)

ॐ शूलपाणये नमः

ॐ खट्वांगिने नमः

ॐ विष्णुवल्लभाय नमः

ॐ शिपिविष्टाय नमः

ॐ अंबिकानाथाय नमः

ॐ श्रीकंठाय नमः

ॐ भक्तवत्सलाय नमः

ॐ भवाय नमः

ॐ शर्वाय नमः
ॐ त्रिलोकेशाय नमः (20)
ॐ शितिकंठाय नमः
ॐ शिवाप्रियाय नमः
ॐ उग्राय नमः
ॐ कपालिने नमः
ॐ कामारये नमः
ॐ अंधकासुर सूदनाय नमः
ॐ गंगाधराय नमः
ॐ ललाटाक्षाय नमः
ॐ कालकालाय नमः
ॐ कृपानिधये नमः (30)
ॐ भीमाय नमः
ॐ परशुहस्ताय नमः
ॐ मृगपाणये नमः
ॐ जटाधराय नमः
ॐ कैलासवासिने नमः
ॐ कवचिने नमः
ॐ कठोराय नमः
ॐ त्रिपुरांतकाय नमः

ॐ वृषांकाय नमः

ॐ वृषभारूढाय नमः (40)

ॐ भस्मोद्धूलित विग्रहाय नमः

ॐ सामप्रियाय नमः

ॐ स्वरमयाय नमः

ॐ त्रयीमूर्तये नमः

ॐ अनीश्वराय नमः

ॐ सर्वज्ञाय नमः

ॐ परमात्मने नमः

ॐ सोमसूर्याग्नि लोचनाय नमः

ॐ हविषे नमः

ॐ यज्ञमयाय नमः (50)

ॐ सोमाय नमः

ॐ पंचवक्त्राय नमः

ॐ सदाशिवाय नमः

ॐ विश्वेश्वराय नमः

ॐ वीरभद्राय नमः

ॐ गणनाथाय नमः

ॐ प्रजापतये नमः

ॐ हिरण्यरेतसे नमः

ॐ दुर्धर्षाय नमः

ॐ गिरीशाय नमः (60)

ॐ गिरिशाय नमः

ॐ अनघाय नमः

ॐ भुजंग भूषणाय नमः

ॐ भर्गाय नमः

ॐ गिरिधन्वने नमः

ॐ गिरिप्रियाय नमः

ॐ कृत्तिवाससे नमः

ॐ पुरारातये नमः

ॐ भगवते नमः

ॐ प्रमथाधिपाय नमः (70)

ॐ मृत्युंजयाय नमः

ॐ सूक्ष्मतनवे नमः

ॐ जगद्व्यापिने नमः

ॐ जगद्गुरवे नमः

ॐ व्योमकेशाय नमः

ॐ महासेन जनकाय नमः

ॐ चारुविक्रमाय नमः

ॐ रुद्राय नमः

ॐ भूतपतये नमः

ॐ स्थाणवे नमः (80)

ॐ अहिर्बुध्न्याय नमः

ॐ दिगंबराय नमः

ॐ अष्टमूर्तये नमः

ॐ अनेकात्मने नमः

ॐ सात्त्विकाय नमः

ॐ शुद्धविग्रहाय नमः

ॐ शाश्वताय नमः

ॐ खंडपरशवे नमः

ॐ अजाय नमः

ॐ पाशविमोचकाय नमः (90)

ॐ मृडाय नमः

ॐ पशुपतये नमः

ॐ देवाय नमः

ॐ महादेवाय नमः

ॐ अव्ययाय नमः

ॐ हरये नमः

ॐ पूषदंतभिदे नमः

ॐ अव्यग्राय नमः

ॐ दक्षाध्वरहराय नमः

ॐ हराय नमः (100)

ॐ भगनेत्रभिदे नमः

ॐ अव्यक्ताय नमः

ॐ सहस्राक्षाय नमः

ॐ सहस्रपादे नमः

ॐ अपवर्गप्रदाय नमः

ॐ अनंताय नमः

ॐ तारकाय नमः

ॐ परमेश्वराय नमः (108)

इति श्रीशिवाष्टोत्तरशतनामावलिः समाप्ता

## MAHA LINGA MANTRAM - महा लिंगा मंत्रम

ॐ निधाना पतये नमः ! ॐ निधाना पततिकाया नमः !

ॐ ऊर्ध्वय नमः ! ॐ उर्ध्वा लिंगय्या नमः !

ॐ हिरण्यया नमः ! ॐ हिरण्य लिंगय्या नमः !

ॐ सुवर्णया नमः ! ॐ सुवर्ण लिंगय्या नमः !

ॐ दिव्याया नमः ! ॐ दिव्या लिंगय्या नमः !

ॐ भव्य नमः ! ॐ भाव लिंगय्या नमः !

ॐ सर्वया नमः ! ॐ सर्व लिंगय्या नमः !

ॐ सिवाय नमः ! ॐ शिव लिंगय्या नमः !

ॐ ज्वालय नमः ! ॐ ज्वाला लिंगय्या नमः !

ॐ ात्मय नमः ! ॐ आत्मा लिंगय्या नमः !

ॐ परमाया नमः ! ॐ परमा लिंगय्या नमः !

ेट था समस्या सूर्यस्य सर्व लिंगय्या स्थापयति पानी मंत्रम पवित्रम !!